# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर–२०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ८ | गुणाः – ७० |
| विषयः – साहित्यम् | (C.E.- 2.3.6. Old ) | समयः –८.०० तः ११.०० |
| दिनाङ्कः – १७/१०/२०१९ | सन्दर्भग्रन्थः – वेणीसंहार – नाटकम् | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः श्लोकयोः व्याख्या विधेया।** १०

(१) मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन ॥

(२) चञ्चद्भुजभ्रमितचण्डगदाऽभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानाऽवनद्धघनशोणितेशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः ॥

(३) आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्तु देवं पुराणम् ॥

**प्रश्नः २** वेणीसंहारनाटकरचयितुः परिचयं लिखत। १०

**अथवा**

प्रथमाङ्कस्य सारांशं लिखत।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नेषु श्लोकद्वयस्य सप्रसङ्गं व्याख्या कार्या।** १०

(१) सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतः सुयोधनम् ॥

(२) इयमस्यदुपाश्रयैकचित्ता मनसा प्रेमनिबद्धमत्सरेण।
नियतं कुपितातिवल्लभत्वात् स्वयमुत्प्रेक्ष्य ममापराधलेशम् ॥

(३) ग्रहाणां चरितं स्वप्नोऽनिमित्तान्युपयाचितम्।
फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ॥

**प्रश्नः ४** द्वितीयाङ्कस्य सारांशं लिखन्तु। १०

**अथवा**

वेणीसंहारे प्रधानः कः रसः ? तत् सोदाहरणं विवेचयन्तु।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नेषु श्लोकद्वयस्य सप्रसङ्गं व्याख्या विधेया।** **१०**

(१) एतेऽपि तस्य कुपितस्य महास्त्रपाणेः किं धूर्जटेरिव तुलामुपयान्ति सङ्ख्ये।
शोकोपरुद्धहृदयेन यदा तु शस्त्रं त्यक्तं तदाऽस्य विहितं रिपुणाऽतिघोरम्॥

(२) श्रुत्वा वधं मम मृषाा सुतवत्सलेन तात ! त्वया सह शरैरसवो विमुक्ताः।
जीवाम्यहं पुनरहो भवता विनाऽपि क्रूरेऽपि तन्मयि मुधा तव पक्षपातः॥

(३) आजन्मनो न वितथं भवता किलोक्तं न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः।
ताते गुरौ द्विजवरे मम भाग्यदोषात् सर्वं तदेकपद एव कथं निरस्तम्॥

**प्रश्नः ६** दुर्योधनाश्वत्थाम्नोः चरित्रचित्रणं लिखत। **१०**

**अथवा**

तृतीयाङ्कस्य सारं लिखत।

## संयुक्तान्वितिः

**प्रश्नः ७ लघूत्तराणि लिखत। (दशानाम्)** **१०**

(१) वेणीसंहारनाटकस्य लेखकः कः ?

(२) भट्टनारायणस्य मूलं स्थानं किमासीत् ?

(३) भट्टनारायणः कस्मिन् प्रदेशे स्ववसतिं चकार ?

(४) भट्टनारायणस्य मातापित्रोः किं नामासीत् ?

(५) प्रथमाङ्के कति श्लोकाः ?

(६) वेणीसंहारस्य मुख्यनायकः कः ?

(७) वेणीसंहारस्य प्रतिनायकः कः ?

(८) अर्जुनस्य सखा सारथिश्च कः ?

(९) दुर्योधनपत्न्याः नाम किम् ?

(१०) द्रोणाचार्यस्य श्यालकः कः ?

(११) द्रोणाचार्यस्य पुत्रः कः ?

(१२) धृतराष्ट्रस्य सारथिः कः ?

(१३) भट्टनारायणः कस्य देवस्य भक्तः प्रतीयते ?

(१४) गोविन्देन सुदर्शनस्य निशितं धारापथं प्रापितः इति कस्योक्तिः ?

(१५) वेणीसंहारनाटकस्य नायिका का विद्यते ?

----oooo----